Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

॥ श्री नरसिंह जी अष्टकम ॥

श्री नृसिंहाष्टकम्

पारंपरिक संस्कृत पाठ • आठ मुख्य पद एवं फलश्रुति

Full Disclaimer

This book is for educational, inspirational, and cultural purposes only. The remedies, rituals, affirmations, breathing methods, and spiritual practices described are based on traditional beliefs, historical customs, and personal development principles. They are not guaranteed solutions.

This book does not replace advice from licensed doctors, psychologists, financial advisors, lawyers, or other qualified professionals. If you have medical symptoms, mental health concerns, legal matters, or financial risk, seek professional help.

Use all remedies responsibly, ethically, peacefully, and according to local law. Do not use fire, herbs, fasting, incense, or physical practices in unsafe ways. The author and publisher are not liable for misuse.

Results in life depend on effort, discipline, timing, environment, skill, and many other factors. No spiritual method guarantees money, marriage, success, healing, or protection.

Hargharpanditji
"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

॥ श्री नरसिंह जी अष्टकम ॥

॥ श्री नृसिंहाष्टकम् ॥

सुन्दरजामातृमुनेः प्रपद्ये चरणाम्बुजम् ।
संसारार्णवसंमग्नजन्तुसंतारपोतकम् ॥

श्रीमदकलङ्क परिपूर्ण! शशिकोटि-
श्रीधर! मनोहर! सटापटल कान्त! ।
पालय कृपालय! भवाम्बुधि-निमग्नं
दैत्यवरकाल! नरसिंह! नरसिंह! ॥ १॥

पादकमलावनत पातकि-जनानां
पातकदवानल! पतत्रिवर-केतो! ।
भावन! परायण! भवार्तिहरया मां
पाहि कृपयैव नरसिंह! नरसिंह! ॥ २॥

"PUJA ON YOUR SCREEN, BLESSINGS AT YOUR DOOR"

तुङ्गनख-पङ्क्ति-दलितासुर-वरासृक्
पङ्क-नवकुङ्कुम-विपङ्किल-महोरः ।
पण्डितनिधान-कमलालय नमस्ते
पङ्कजनिषण्ण! नरसिंह! नरसिंह! ॥ ३॥

॥ श्री नरसिंह जी अष्टकम ॥

॥ श्री नृसिंहाष्टकम् ॥

मौलेषु विभूषणमिवामर वराणां
योगिहृदयेषु च शिरस्सु निगमानाम् ।
राजदरविन्द-रुचिरं पदयुगं ते
देहि मम मूर्ध्नि नरसिंह! नरसिंह! ॥ ४॥

वारिजविलोचन! मदन्तिम-दशायां
क्लेश-विवशीकृत-समस्त-करणायाम् ।
एहि रमया सह शरण्य! विहगानां
नाथमधिरुह्य नरसिंह! नरसिंह! ॥ ५॥

हाटक-किरीट-वरहार-वनमाला
धाररशना-मकरकुण्डल-मणीन्द्रैः ।
भूषितमशेष-निलयं तव वपुर्मे
चेतसि चकास्तु नरसिंह! नरसिंह! ॥ ६॥

॥ श्री नरसिंह जी अष्टकम ॥

॥ श्री नृसिंहाष्टकम् ॥

इन्दु रवि पावक विलोचन! रमायाः
मन्दिर! महाभुज! लसद्वर-रथाङ्ग! ।
सुन्दर! चिराय रमतां त्वयि मनो मे
नन्दित सुरेश! नरसिंह! नरसिंह! ॥ ७॥

माधव! मुकुन्द! मधुसूदन! मुरारे!
वामन! नृसिंह! शरणं भव नतानाम् ।
कामद घृणिन् निखिलकारण नयेयं
काललमरेश नरसिंह! नरसिंह! ॥ ८॥

॥ फलश्रुतिः ॥

अष्टकमिदं सकल-पातक-भयघ्नं
कामदं अशेष-दुरितामय-रिपुघ्नम् ।
यः पठति सन्ततमशेष-निलयं ते
गच्छति पदं स नरसिंह! नरसिंह! ॥ ९॥

॥ इति श्रीनृसिंहाष्टकं सम्पूर्णम् ॥